# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ७३

ऋषेर्वचनमाज्ञाय रामः सन्ध्यामुपासितुम् ।
उपाक्रामत्सरः पुण्यमप्सरोभिर्निषेवितम् ॥ १॥

तत्रोदकमुपस्पृष्य सन्ध्यामन्वास्य पश्चिमाम् ।
आश्रमं प्राविशद्रामः कुम्भयोनेर्महात्मनः ॥ २॥

अस्यागस्त्यो बहुगुणं फलमूलं तथौषधीः ।
शाकानि च पवित्राणि भोजनार्थमकल्पयत् ॥ ३॥

स भुक्तवान्नरश्रेष्ठस्तदन्नममृतोपमम् ।
प्रीतश्च परितुष्टश्च तां रात्रिं समुपावसत् ॥ ४॥

प्रभाते काल्यमुत्थाय कृत्वाह्निकमरिन्दमः ।
ऋषिं समभिचक्राम गमनाय रघूत्तमः ॥ ५॥

अभिवाद्याब्रवीद्रामो महर्षिं कुम्भसम्भवम् ।
आपृच्छे त्वां गमिष्यामि मामनुज्ञातुमर्हसि ॥ ६॥

धन्योऽस्म्यनुगृहीतोऽस्मि दर्शनेन महात्मनः ।
द्रष्टुं चैवागमिष्यामि पावनार्थमिहात्मनः ॥ ७॥

तथा वदति काकुत्स्थे वाक्यमद्भुतदर्शनम् ।
उवाच परमप्रीतो धर्मनेत्रस्तपोधनः ॥ ८॥

अत्यद्भुतमिदं वाक्यं तव राम शुभाक्षरम् ।
पावनः सर्वलोकानां त्वमेव रघुनन्दन ॥ ९॥

मुहूर्तमपि राम त्वां ये नु पश्यन्ति के चन ।
पाविताः स्वर्गभूतास्ते पूज्यन्ते दिवि दैवतैः ॥ १०॥

ये च त्वां घोरचक्षुर्भिरीक्षन्ते प्राणिनो भुवि ।
हतास्ते यमदण्डेन सद्यो निरयगामिनः ॥ ११॥

गच्छ चारिष्टमव्यग्रः पन्थानमकुतोभयम् ।
प्रशाधि राज्यं धर्मेण गतिर्हि जगतो भवान् ॥ १२॥

एवमुक्तस्तु मुनिना प्राञ्जलिः प्रपग्रहो नृपः ।
अभ्यवादयत प्राज्ञस्तमृषिं पुण्यशीलिनम् ॥ १३॥

अभिवाद्य मुनिश्रेष्ठं तांश्च सर्वांस्तपोधनान् ।
अध्यारोहत्तदव्यग्रः पुष्पकं हेमभूषितम् ॥ १४॥

तं प्रयान्तं मुनिगणा आशीर्वादैः समन्ततः ।
अपूजयन्महेन्द्राभं सहस्राक्षमिवामराः ॥ १५॥

स्वस्थः स ददृशे रामः पुष्पके हेमभूषिते ।
शशी मेघसमीपस्थो यथा जलधरागमे ॥ १६॥

ततोऽर्धदिवसे प्राप्ते पूज्यमानस्ततस्ततः ।
अयोध्यां प्राप्य काकुत्स्थो विमानादवरोहत ॥ १७॥

ततो विसृज्य रुचिरं पुष्पकं कामगामिनम् ।
कक्ष्यान्तरविनिक्षिप्तं द्वाःस्थं रामोऽब्रवीद्वचः ॥ १८॥

लक्ष्मणं भरतं चैव गत्वा तौ लघुविक्रमौ ।
ममागमनमाख्याय शब्दापय च मां चिरम् ॥ १९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com